# THE SUVARṆAPRABHĀSA SŪTRA

## *Introductory Notes*

The *Suvarṇaprabhāsa,* which is one of the nine canonical writings of Nepalese Buddhism, occupies an important position in the development of Mahāyāna Buddhism. It has been studied both by Chinese and Japanese scholars; many commentaries are still extant, among which we may mention one by Chih-che Tai-shih (智者大師), of the Sui dynasty. As it contains some passages concerning the duties of the king, it has been regarded with special attention by the imperial family of Japan; and an elaborate rite has been performed by them in connection with the recitation and exposition of the sutra. When Prince Shōtoku built the temple Shitennoji (Four Guardian-gods Temple), now abbreviated Tennōji (天王寺), in Osaka, in 587 A.D. in honour of this sutra, the name was taken from the chapters in which the guardian-gods promise to protect those who recite and practise the teaching of the sutra. When later a state temple was established by the Emperor Shōmu in each of the provinces for the promotion of the national welfare, a copy of the sutra was deposited in it.

Studies of the sutra have been pursued by almost all the schools of Buddhism, but chiefly by the Tendai. There are five Chinese translations, the first of which was made by Dharmaraksha of the Liang dynasty (412–421 A.D.). As to further details concerning the translations and also problems in relation to the historical and doctrinal aspects of the sutra, the present editor intends to write a special introduction when the whole text is ready for the public.

The text edited here was first copied by the late Reverend Dr. Bunyiu Nanjio in 1881 when he was studying at Oxford, from a manuscript in the Bibliothèque Nationale in Paris, and another in the Royal Asiatic Society, London, which he later collated with one of the manuscripts kept in

Cambridge University. After he came back to Japan, he further collated his own copy with the manuscripts in the Tokyo and the Kyoto Imperial University. The work was finished, according to the entry of his copy-book, in 1915. When he died in 1927, the copy was left in my charge with the idea that I should if possible produce a more complete edition. Further comparisons were made by me with the three Tibetan translations of the sutra, assisted by Mr. Bunkyo Sakurabe, of Otani University, and also with the Chinese translations by Dharmaraksha and others.

I should be ungrateful were I not to acknowledge the suggestions made from time to time by Dr. Unrai Wogihara whose keen judgments have been of great help in disentangling many a difficult knot in the text.

I am very glad that I am now able to present to the readers of this magazine a critical edition of the sutra in which my late master's labours are so much in evidence, and if he had been allowed to live a few years longer, he would have seen the text printed under his own direction.

23 October, 1928.

HOKEI IZUMI

### Abbreviations

A.—MS in the Royal Asiatic Society, London.

C.—MS in the Cambridge University Library.

I.—an incomplete edition by Sarat Chandra Das and Satis Chandra Acarya Vidyabhushana, at Darjeeling, India, 1900.

K.—MS in the Kyoto University.

P.—Photographic copy of the MS in the Bibliothèque Nationale, Paris, taken by Professor D. T. Suzuki, in 1910.

T.—MS in the Tokyo University.

Tib. denotes the Tibetan translations, of which there are three in four copies kept in the Otani University Library, Kyoto:

(1) Translator not known, agreeing mostly with our text;

(2) Translated by Jinamitra together with Silendrabodhi and Ye She De;

(3) The same; hand-copied manuscript somewhat damaged; the last two seem to be made from the same original Sanskrit text which was also most probably used by I-tsing;

(4) Translated from I-tsing's Chinese translation by a Tibetan named Chos-grub.

(涼) (合) (唐) are the three Chinese translations, respectively denoting Dharmaraksha's translation, Pao Keue's compilation, and I-tsing's translation.

## ॥ सुवर्णप्रभासोत्तमसूत्रेन्द्रराजः ॥

ओँ नमः श्रीसर्वबुद्धबोधिसत्त्वेभ्यः[1]। ओँ नमो भगव= त्या आर्यश्री[2]प्रज्ञापारमितायै । तद्यथा[3]। ओँ[4] श्रुतिस्मृति- गतिविजये स्वाहा ।

यस्मि[5]न्पारमितादशोत्तमगुणास्तैस्तैर्नयैः[6] सू[7]चिताः
सर्वज्ञेन जगद्धिताय दश च प्रख्यापिता भूमयः ।
उच्छेदध्रुववर्जिता च विमला प्रोक्ता[8] गतिर्मध्यमा[9]
तत्सूत्रं स्वर्णप्रभानिगदितं शृण्वन्तु बोध्यर्थिनः ॥
श्रुतं मयैकसमये गृध्रकूटे तथागतः ।
विजहार धर्मधातौ गम्भीरे बुद्धगोचरे ॥१॥

[10]बोधिसत्त्वसमुच्चयया महाकुलदेवतया । सरस्वत्या च

[1] In C. K. T. but श्री left out in T. [2] श्री left out in C. नमः श्री भगवत्यै आर्यप्रज्ञा° K. [3] Left out in A. [4] Left out in C. K. [5] From यस्मिन् till बोध्यर्थिनः in T. only, but this also appears in the beginning of the Daśabhūmīśvara where स्वर्णप्रभा is replaced by दशभूमिकं [6] स्तैर्नः in all MSS. [7] सु in all MSS. [8] प्रान्ता in all MSS. [9] मा: in all MSS. [10] The following eight lines, with variants as marked, are wanting in the Tibetan version as well as Dharmarakṣa's Chinese translation. The introduction of Ānanda here has no vital connection with the context, and in fact interferes with the intelligent understanding of it. It may be regarded as a later interpolation.

महादेवतया । श्रिया च महादेवतया । दृढया च महापृथिवीदेवतया । हारीत्या च महादेवतया । एवंप्रमुखाभिर्महादेवताभिरनेकदेवनागयक्षराक्षसगन्धर्वासुरगरुडकिंनरमहोरगमनुष्यामनुष्यैः सार्धम्[1] ॥ अथायुष्मानानन्दो भगवन्तमेतदवोचत् । किं तासां[2] भगवन्धर्मविनयं भविष्यतीति । भगवानाह गाथाभिः । भावनं[3] च न[4] दुःपृच्छया विरजस्कं समाधिं धर्मसारं[5] प्रतिष्ठितम् ॥

शुद्धेषु विरजस्केषु बोधिसत्त्वोत्तमेषु च ।
निदानं सूत्रराजेन्द्रं स्वर्णप्रभासोत्तममिदम् ॥२॥
ततो गम्भीरश्रवणेन गम्भीरव्युप[6]परीक्षणेन[7] ।
दिक्षु[8] चतसृषु[9] बुद्धैरधिष्ठानमधिष्ठितम् ॥३॥
अक्षोभ्यराजः[10] पूर्वस्मिन्दक्षिणे रत्नकेतुना ।
पश्चिमायाममिताभ[11] उत्तरे दुन्दुभिस्वरः ॥४॥
तं प्रवक्ष्याम्यधिष्ठानं माङ्गल्यदेशनोत्तमम् ।
सर्वपापविनाशार्थं सर्वपापक्षयंकरम् ॥५॥

[1] सार्धम् left out in A. [2] तासां च K. [3] व left out in A. T. [4] च न left out in C. गायाभिः येन च I. [5] धर्मसंसारं A. [6] व्यव A. [7] The metre is irregular, as is often met with in the Buddhist poems. "Buddhist poets do not obey the ordinary rules of metre, or rather their rules of quantity of pronunciation differ from those of later grammarians." Vajracchedikā p. 46. note. [8] दशदिसु in all MSS. [9] च तिसृषु I. [10] राजः C. T. न्त A. [11] पश्चिमस्याममिताभेन A.; and this quarter is of incorrect metre.

सर्वसौख्यप्रदातारं सर्वदुःखविनाशनम् ।
मूलं सर्वज्ञतत्त्वस्य[1] सर्वश्रीसमलंकृतम् ॥६॥
उपहतेन्द्रिया ये हि[2] सत्त्वा नष्टा हतायुषः ।
अलक्ष्म्या[3] परिविष्टा[4] हि देवतासु पराङ्मुखाः ॥७॥
कान्तया ते[5] जना द्विष्टाः[6] कुटुम्बादिष्वपद्रुताः[7] ।
परस्परविरुद्धा[8] वा अर्थनाशैरुपद्रुताः ॥८॥
शोकायासेष्वनर्थे[9] च भये व्यसन एव च ।
ग्रहनक्षत्रपीडायां काखोर्ददारुणग्रहैः[10] ॥९॥
पापकं पश्यते[11] स्वप्ने[12] शोकायाससमुच्छ्रितम् ।
तेन च[13] स्नानशुचिना श्रोतव्यं सूत्रमुत्तमम् ॥१०॥
शृण्वन्ति य इदं सूत्रं गम्भीरं बुद्धगोचरम् ।
प्रसन्नचित्ताः सुमनसः[14] शुचिवस्त्रैरलंकृताः ॥११॥
तेषां सर्वे तथा नित्यमुपसर्गाः सुदारुणाः ।
तेजसा चास्य सूत्रस्य शाम्यन्ते सर्वप्राणिनाम् ॥१२॥
स्वयं ते[15] लोकपालाश्च सामात्याः सगणेश्वराः ।

[1] नत्व C. [2] हि left out in A. [3] अलक्षा in all MSS. [4] གདང་ཅགས Tib.
[5] ये C. K. य T. [6] Ex conject.; निष्टाः A. K. T. रिष्टाः C. निष्टाः I.
[7] °पद्युताः A. C. T. प्रद्रुडलगा K. [8] सविरोद्धा A. निवुद्धा C. विरूद्धा I.
[9] समनर्थ्ये A. सप्यनर्थे K. सोप्यनेर्थे T. [10] Ex conject.; पीडाचा कायोददा A. पीशायां काखोर्ददा C. भीता ये कान्ता वा दारुणग्रहैः I. पीडाथा यां K. पीत्रायां काखोर्ददा T. [11] पश्यति I. [12] स्वप्नं I. [13] Supplied for the sake of metre.
[14] सौमनस्काः प्रसन्नास्याः C. K. T. [15] शपन्ते I.

तेषां रक्षां करिष्यन्ति ह्यनेकैर्यक्षकोटिभिः ॥१३॥
सरस्वती महादेवी तथा नैरञ्जनवासिनी[1] ।
हारीती भूतमाता च दृढा पृथिवीदेवता[2] ॥१४॥
ब्रह्मेन्द्रैस्त्रिदशेन्द्रैश्च महर्द्धिकिंनरेश्वरैः ।
गरुडेन्द्रैस्तथा सार्धं यक्षगन्धर्वपन्नगैः ॥१५॥
ते च तत्रोपसंक्रम्य ससैन्यबलवाहनाः ।
तेषां रक्षां करिष्यन्ति दिवारात्रौ समाहिताः ॥१६॥
इदं सूत्रं प्रकाशिष्ये गम्भीरं बुद्धगोचरम् ।
रहस्यं सर्वबुद्धानां दुर्लभं कल्पकोटिभिः ॥१७॥
[3]शृण्वन्ति य इदं सूत्रं ये चान्ये श्रावयन्ति च ।
ये केचिदनुमोदन्ते ये च पूजां करोन्ति हि ॥१८॥
ते पूजिता भविष्यन्ति ह्यनेकैः कल्पकोटिभिः ।
देवनागमनुष्यैश्च किंनरासुरगुह्यकैः[4] ॥१९॥
पुण्यस्कन्धमपर्यन्तमसंख्येयमचिन्तियम्[5] ।
[6]यत्तेषां प्रसृतं भोति कृतपुण्यान प्राणिनाम् ॥२०॥
[7]प्रगृहीता भविष्यन्ति सर्वबुद्धैर्दिशो दश[8] ।
गम्भीरचरितैर्भिश्च[9] बोधिसत्त्वैस्तथैव च ॥२१॥

[1] Restored from the Tibetan versions where we have: Nairajñana Tib.(a) Nerañjana Tib.(b) परंजनि A. T. श्रीर्जय C. K. I. [2] °ताः K.

[3] The following two verses are left out in A. [4] ग्र C. [5] चिंतित C.

[6] ते A. त T. [7] ग्रू A. [8] बुद्धैर्दिंशास्थितै C. दिगास्थितैः K. [9] च K.

चौक्षचीवरप्रावृत्य[1] सुगन्धजलपावनैः ।
मैत्रीचित्तं[2] समुत्थाप्य[3] पूजितव्यमतन्द्रितैः ॥२२॥
विपुलं विमलं[4] चित्तमात्मानं[5] प्रकरिष्यति ।
प्रसादयंश्च चेतांसि शृणुष्व[6] सूत्रमुत्तमम् ॥२३॥
स्वागतं च[7] मनुष्येषु सुलब्धं[8] मनुषं फलम्[9] ।
सुजीविताश्च जीवन्ति सूत्रं शृण्वन्ति ये त्विदम्[10]॥२४॥
उप्तकुशलमूलास्ते[11] बहुबुद्धप्रकाशिताः[12] ।
येषामिदं कर्णपुटे देशितं संप्रविश्यतीति ॥२५॥

इति [13]श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे[14] निदानपरिवर्तो[15] नाम प्रथमः ॥

[1] वौद्ध I. [2] चित्रं K. [3] य K. [4] वि लं विमलं A. C.
[5] चित्र I. [6] ०ष्वं A. [7] स्वागतश्चा C. [8] सुरम्यं I. च स्वप्नं K.
[9] In Tib. སྲིད which means भव. [10] ये इदं A. [11] उद्गम A.
उत्तम C. སྦྱངས Tib. [12] बुद्धोपसेवकाः C. K. T. [13] श्री left out in A.
[14] सूत्र ाजे C. [15] वर्तः प्र A.

# तथागतायुःप्रमाणनिर्देशपरिवर्तो

तेन खलु पुनः कालेन तेन समयेन राजगृहे महानगरे रुचिरकेतुर्नाम बोधिसत्त्वो महासत्त्वः[1] प्रतिवसति पूर्वजिनकृताधिकारो[2] ऽवरोपितकुशलमूलो बहुबुद्धकोटि[3]-नियुतशतसहस्रपर्युपासितः तस्यैतदभवत्[4]। को हेतुः कः प्रत्ययो यद्भगवतः शाक्यमुनेरेवं परीत्तमायुःप्रमाणं यदुताशीतिवर्षाणीति[5] ॥

पुनस्तस्यैतदभवत्। उक्तं चैव भगवता द्वौ हेतू द्वौ च प्रत्ययौ दीर्घायुष्कतायाम्। कतमौ द्वौ प्राणातिपातवैरमणं भोजनप्रदानं च ॥ अथ च[6] बहून्यसंख्येयकल्पकोटिनियुतशतसहस्राणि भगवाञ्छाक्यमुनिः प्राणातिपातप्रतिविरतो बभूव। यावद्दशकुशलकर्मपथं[7] समादापयेत्[8] तावद्भगवता भोजनमाध्यात्मिकं बाह्यानि च वस्तूनि सत्त्वानां परित्यक्तानि। अन्तशः स्वशरीरमांसरुधिरास्थिमज्जया बुभुक्षिताः सत्त्वाः संतर्पिताः प्रागेवान्येन[9] भोजनेन च[10] ॥

[1] महासत्त्वः left out in C. [2] ०धिका left out in T. [3] टि read टी throughout in the prose portion. [4] ०दवोचत् A. [5] णी A. णि K. ति left out in A. T. [6] च left out in T. [7] थां A. [8] येत्: C. [9] ०न्येन in all MSS. [10] च left out in A. T.

अथ तस्य पुरुषस्य बुद्धानुस्मृतिमनसिकारस्येमामेवं-[1]रूपां चिन्तां चिन्तयमानस्य गृहं विपुलं विस्तीर्णं सं=प्रवृत्तमभवत् । वैडूर्यमयमनेकदिव्यरत्नप्रत्युप्तं तथागतवि=ग्रहं दिव्यातिक्रान्तेन गन्धेन स्फुटम् । तस्मिंश्च गृहे चतु=र्दिशि चत्वारि दिव्यरत्नमयान्यासनानि प्रादुर्भूतान्यभूवन् । तेषु चासनेषु दिव्यानि पर्यङ्कानि दिव्यरत्नदूष्य[2]पटप्रज्ञप्ता=नि प्रादुर्भूतानि बभूवुः । तेषु पर्यङ्केषु दिव्यान्यनेकरत्नप्र=त्युप्तानि तथागतविग्रहा[3]णि पद्मानि प्रादुर्भूतानि । तेषु च पद्मेषु चत्वारो बुद्धा भगवन्तः प्रादुर्भूता बभूवुः । पुरान्ति=[4]केन त्वक्षोभ्यस्तथागतः प्रादुर्भूतो दक्षिणेन रत्नकेतुस्त=थागतः प्रादुर्भूतः पश्चिमेनामितायुस्तथागतः प्रादुर्भूत उत्त=रेण दुन्दुभिस्वरस्तथागतः प्रादुर्भूतः । समनन्तरप्रादुर्भूताश्च ते[5] बुद्धा भगवन्तस्तेषु सिंहासनेषु । अथ तावदेव राजगृहं महानगरं महतावभासेनावभासितं स्फुटं बभूव । यावत्त्रि-साहस्रमहासाहस्रलोकधातुर्यावत्समन्ताद्दशसु दिक्षु गङ्गा-नदीवालुकासमा लोकधातवस्तेनावभासेन स्फुटा बभू=वुः । दिव्यानि च पुष्पाणि प्रावर्षु[6]र्दिव्यानि[7] च तूर्याणि

[1] °मेव दिव्यरूपां in all MSS. एवंरूपां Tib. [2] पुष्पपतैः A. °युग C. T.
[3] जराणि in MSS. This is quite puzzling; but the restoration has been made from Tib.
[4] पूर्वाद्यो A. पुरस्तिमेन C. पुरान्तिके T. [5] तास्ते C. तेष्वासते P. ता आसते ते T. [6] प्रवर्षेयु A. [7] वाद्यानि A.

प्रवादयामासुः । सर्वे चास्मिंस्त्रिसाहस्रमहासाहस्रे[1]लोकधातौ सत्त्वा बुद्धानुभावेन दिव्यसुखेन समन्वागता बभूवुः । जात्यन्धाश्च सत्त्वा रूपाणि पश्यन्ति स्म[2] । बधिराश्च सत्त्वाः सत्त्वेभ्यः शब्दानि शृण्वन्ति । उन्मत्ताश्च सत्त्वाः स्मृतिं प्रतिलभन्तेऽविक्षिप्तचित्ताश्च स्मृतिमन्तो बभूवुः । नग्नाश्च सत्त्वाश्चीवरप्रवृता बभूवुः । जिघत्सिता[3]श्च सत्त्वाः परिपूर्णगात्रा बभूवुः । तृषिताश्च सत्त्वा विगततृष्णा बभूवुः । रोगस्पृ[4]ष्टाश्च सत्त्वा विगतरोगा बभूवुः । हीनकायाश्च सत्त्वाः परिपू[5]र्णेन्द्रिया बभूवुः । विस्तरेण बहूनामाश्चर्याद्भुतधर्माणां लोके प्रादुर्भावोऽभूत्[6] ॥

अथ खलु[7] रुचिरकेतुर्बोधिसत्त्वो महास[8]त्त्वस्तान्बुद्धान्भगवतो दृष्ट्वाश्चर्यप्राप्तो बभूव । कथमेतदिति संतुष्ट उदग्र आत्तमनाः[9] प्रमुदितः प्रीतिसौमनस्यजातो येन ते बुद्धा भगवन्तस्तेनाञ्जलिं प्रणम्याकारतस्तान्बुद्धान्भगवतोऽनुस्मरमाणो भगवतः शाक्यमुनेर्गुणा[10]ननुस्मरमाणो भगवतः शाक्यमुनेरायुःप्रमाणसंशयप्राप्तस्तां चिन्तां चिन्तयमानः स्थितो बभूव । कथमेतत्किमेतद्यद्भगवतः शाक्यमुनेरेवं परीत्तमायुःप्रमाणं यदुताशीतिवर्षाणि ॥

[1] स्रे C. [2] In T. only. [3] जघ्रांसि A. जिघंसि T. [4] स्पृ A. T. पृ C.
[5] सं C. [6] बभूवु A. K. बभूव T. [7] In A. only. [8] महासत्त्व left out in K.
[9] आत्मनाः A. शान्तमनाः C. [10] गुणेनु A. गणानुसंशामुनु C. गुणानुस्मर I. T

अथ खलु ते बुद्धा भगवन्तः स्मृताः संप्रजानास्तं[1] रुचि=रकेतुं बोधिसत्त्वमेतदवोचन्[2]। मा त्वं कुलपुत्रैवं चिन्तय एवं परीत्तं भगवतः शाक्यमुनेरायुःप्रमाणम्[3] । तत्कस्य हेतोः । न चवै कुलपुत्र तं[4] समनुपश्यामः सदेवके लोके[5] समारके सब्रह्मके सश्रमणब्राह्मणिकायां प्रजायां सदेवमा=नुषासुरायां यः समर्थः स्याद्भगवतः शाक्यमुनेस्तथाग=तस्यायुःप्रमाणपर्यन्तमधिगन्तुं यावदपरान्तकोटिभिः स्था=पयित्वा तथागतैरर्हद्भिः सम्यक्संबुद्धैः । समनन्तरोदाहृते[6] तैर्बुद्धैर्भगवद्भिस्तथागतायुःप्रमाणनिर्देशे। अथ तावद्बुद्धानु=भावेन कामावचरा रूपावचराश्च देवपुत्राः संनिपतिता यावन्नागयक्षगन्धर्वासुरगरुडकिंनरमहोरगा अनेकानि च बोधिसत्त्वकोटिनियुतशतसहस्राणि तस्मिन्रुचिरकेतुबोधि=सत्त्वस्य गृहे समागता आसन्[7]। अथ ते तथागताः सर्व-पर्षदो[8] भगवतः शाक्यमुनेरायुःप्रमाणनिर्देशं गाथाभिर=भ्यभाषन्[9] ॥

जलार्णवेषु सर्वेषु[10] शक्यन्ते बिन्दुभिर्गणयितुम्[11] ।
न तु[12] शाक्यमुनेरायुः शक्यं गणयितुं क्वचित् ॥१॥

[1] तं left out in C. [2] चत् in all MSS. [3] आयुष्प्रमाणं is put in before भगवतः in C. [4] त T. [5] Left out in A. [6] हृतश्च A. हृते च C. हृते च T. [7] आसन् left out in A. [8] सर्वावती C. T. [9] रभ्यभाषितः A. रभाषन् C. K. T. [10] In C. only. [11] सक्य गनितुं विदुवः A. गणयितुम्बिन्दु=भिः T. [12] न तु left out in C.

सुमेरुं परमाणवः[1] कृत्वा शक्यं च संख्यया[2] ।
न तु शाक्यमुनेरायुः[3] शक्यं गणयितुं क्वचित् ॥२॥
[4]याः काश्चित्पृथिवीः सन्ति यावन्तः परमाणवः ।
शक्यं गणयितुं सर्वा न तु चायुर्जिनस्य वै ॥३॥
आकाशं यदि वा कश्चिदिच्छेत्प्रमितुं केनचित्[5] ।
न तु शाक्यमुनेरायुः शक्यं गणयितुं क्वचित् ॥४॥
इत्युक्तानि[6] च कल्पानि[7] कल्पकोटिशतानि च ।
एष तिष्ठेच्च संबुद्धः संख्यातो न हि लभ्यते ॥५॥
[8]यस्माद्द्वे कारणे[9] तस्य तथैव द्वौ च प्रत्ययौ ।
विरतः [10]परहिंसाया[11] बहु दत्तं च भोजनम् ॥६॥
यस्मात्तस्य महात्मस्य ह्यायुःसंख्या न लभ्यते ।
इत्युक्तानि[12] च कल्पानि संख्यायान्न तथैव[13] च ॥७॥
[14]तस्मान्न संशयो भो हि मा किंचित्कुरु संशयम् ।
न जिनस्यायुःपर्यन्तं काचि[15]त्संख्योपलभ्यते ॥८॥

[1] रुनि च सर्वानिः A. परमाणनि C. [2] From शक्यं till शाक्यमुनेरायुः left out in A. [3] शाक्यमुनेरायुःप्राण C., and पारण A. [4] This line is left out in C. while A. reads: पृथिवी कृत्वा परमाणवः शक्यं गणयितुम् । न तु शाक्यमुनरायुः शक्यं गणयितुं क्वचित्॥ [5] कश्चिदिशेत्प्रथितु केनचित् A. कश्चिदिच्छेत्मियितुं क्वचित् T. [6] एतत्कानि A. [7] कल्पानि left out in T. [8] त in all MSS. [9] णौ A. [10] पाप in all MSS while in Tib. [illegible] [11] यां A. C. याः T. [12] एतत्कानि A. [13] कल्पा असंख्ययास्तयेव A. कल्पानि संख्याया च तथैव C. [14] A. reads this line: तस्मानि संसयो भो हि मां किंचित्कुल संसय । while C. puts किंचित् in before सो हि [15] महान्तो केचि A.

अथ खलु तस्मिन्समये तत्र पर्षद्याचार्यव्याकरणप्राप्तः कौण्डिन्यो[1] नाम ब्राह्मणोऽनेकैर्ब्राह्मणसहस्रैः सार्धं भगवतः पूजाकर्म कृत्वा तथागतस्य [2]महापरिनिर्वाणशब्दं श्रुत्वा सहसोत्थाय भगवतश्चरणयोर्निपत्य भगवन्तमेवमाह। स=चेत्किल भगवन्सर्वसत्त्वानुकम्पको महाकारुणिको हितै=षी सर्वसत्त्वानां मातापितृभूतोऽसमसमभूतश्चन्द्रभूत आ=लोककरो[3] महाप्रज्ञाज्ञानसूर्यसमुद्गतः। यदि त्वं सर्वसत्त्वान् राहुलं स्वं संपश्यसि मह्यमेकं वरं देहि। भगवां=स्तूष्णीभूतोऽभूत्॥

अथ बुद्धानुभावेन तस्यां[4] पर्षदि [5]सर्वसत्त्वप्रियंदर्शनो नाम [6]लिच्छविकुमारस्तस्य प्रतिभानमुत्पन्नं[7] स आचार्य-व्याकरणप्राप्तं कौण्डिन्यं ब्राह्मणमेवमाह। किं नु त्वं [8]महा-ब्राह्मण भगवन्तमेकं वरं याचसि[9]। अहं ते वरं ददामि। ब्राह्मण आह। अहमस्मिँल्लिच्छविकुमार भगवतः पूजोप=स्थानाय भगवतः सर्षपफलमात्रं धातुमिच्छामि निक्षेपितुं [10]चूर्णं धातुमभिप्रयोजनायैनं सर्षपफलमात्रं धातुमभिपू=जयित्वा त्रिदशाधिपत्यं लभ्यत इत्येवं श्रूयते। शृणु त्वं

[1] कौण्डिल्यो I. [2] महा left out in C. [3] समभूतश्च गुरुलारोककरो C. समभूताश्च गुरुरालोककरो T. [4] तस्मिं A. [5] सं is inserted in T. [6] लि=च्छवि? [7] प्रतिभानमुत्पन्नं A. प्रतिभानुत्पन्नं T. [8] महा left out in C. [9] से C. [10] The phrase चूर्णं धातुमभिप्रयोजनाय is simply a repetition of the preceding one, and introduces nothing anew; it may be an interpolation by a later hand.

लिच्छविकुमार सुवर्णप्रभासोत्तमसूत्रं दुर्विज्ञेयं सर्वश्रावकप्रत्येकबुद्धानां तादृशैर्लक्षणगुणैः समन्वागतं किल सुवर्णप्रभासोत्तमसूत्रं भावयिष्यति[1] । एवं भो लिच्छविकुमार दुर्विज्ञेयं दुरनुबोधं सुवर्णप्रभासोत्तमसूत्रम् । अस्माकमेव प्रत्यन्तद्वीपिकानां ब्राह्मणानां[2] सर्षपफलमात्रं धातुं करण्डके निक्षिप्य धारणमुचितम्[3] । अहं ते वरं याचे येन सत्त्वाः क्षिप्रमेव त्रिदशाधिपत्यं प्रतिलम्भिनो[4] भविष्यन्ति । त्वं किल भो लिच्छविकुमार सर्षपफलमात्रं धातुं तथागतस्य याचितुम् । धातुं रत्नकरण्डके निक्षिप्य धारणात्[5] सर्वसत्त्वानां त्रिदशाधिपत्येश्वरलाभ इतीच्छसे[6] । एवं मया च भो लिच्छविकुमार इष्टं[7] वरम्[8] ॥

अथ सर्व[9]सत्त्वप्रियदर्शनो नाम[10] लिच्छविकुमार आचार्यव्याकरणप्राप्तं कौण्डिन्यं ब्राह्मणं गाथाभिरभ्यभाषत ॥

यदा स्रोतःसु गङ्गाया रोहेयुः कुमुदानि च ।

[1] This sentence seems to have no connection with the preceding one. According to the 2nd and the 3rd Chinese version a passage is inserted here, where the Brahman is told to listen to the Suvarṇaprabhāsa with an intent mind in order to be reborn in the heaven; this makes the sense clearer. [2] Left out in C. [3] निक्षिप्तवान् in all MSS. [4] लाभि T. [5] च हिताय A. T. च हितस्य K. left out in C. [6] ते A. त C. तः T. K. [7] तुभ्यं in C. only. [8] दत्तं A. दातुं C. दत्तं T. ཀྱེ་ལིད་ཙ་བྱི་གཞོན་ནུ་ཁྱོ་བོས་ནི་དམ་པ་ དེ་ལྟ་བུ་གསོལ་ཏོ། इष्टं वरम् is supplied from this Tibetan version. [9] लोक in all MSS. [10] Left out in A.

रक्ताः[1] काका भविष्यन्ति शङ्खवर्णाश्च कोकिलाः ॥९॥
जम्बुस्तालफलं दद्यात्खर्जूरश्चाम्रमञ्जरीम्[2] ।
तदा सर्षप[3]मात्रं च[4] व्यक्तं धातुर्भविष्यति[5] ॥१०॥
यदा कच्छपलोमानां प्रावारः सुवृतो भवेत् ।
हेमन्ते शीतहरणो[6] तदा धातुर्भविष्यति ॥११॥
यदा मशकपादानामट्टकालम्बनं[7] भवेत् ।
दृढं चाप्यप्रकम्पि च[8] तदा धातुर्भविष्यति ॥१२॥
यदा तीक्ष्णा महान्तश्च दन्ता जायन्ति पाण्डुराः ।
जलौकानां हि सर्वेषां तदा धातुर्भविष्यति ॥१३॥
यदा शशविषाणेन निःश्रेणी[9] सुदृढा भवेत् ।
स्वर्गस्यारोहणार्थाय तदा धातुर्भविष्यति ॥१४॥
तां निःश्रेणिं[10] यदारुह्य चन्द्रं भक्षति[11] मूषिकः ।
राहुं च परिधावेत तदा धातुर्भविष्यति ॥१५॥
यदा मद्यघटं पीत्वा मक्षिका ग्रामचारिण्यः ।
अगारे वासं[12] कल्पेयुस्तदा धातुर्भविष्यति ॥१६॥
यदा बिम्बोष्ठ[13]संपन्नो गर्दभः सुखितो भवेत् ।
कुशलं नृत्यगीतिषु तदा धातुर्भविष्यति ॥१७॥

[1] Left cut in A. [2] रं वाम् मजनी A. [3] फल is inserted in A. T
[4] च in C. only. [5] च वक्तव्यं त्राह्मणोत्तम C. [6] हरितो A. [7] अहारम् ह्येते A. मम्बिभ्यालम्बनं C. मप्स्लंवनं T. [8] दृढश्चाप्रकवोरेता A. दृढश्चाप्यप्रकम्पी च C. [9] In T. only. [10] In T. only. [11] क्षो T.
[12] वासनगारे A. [13] विद्योम A. तियोंम C. T.

यदा ह्युलूककाकाश्च रमयेयुः सहागताः[1] ।
अन्योन्यमनुकूलेन तदा धातुर्भविष्यति ॥१८॥
यदा पलाशपत्राणां छत्त्रं हि विपुलं[2] भवेत् ।
वर्षस्य प्रतिघाताय तदा धातुर्भविष्यति ॥१९॥
यदा सामुद्रिका नावः सयन्त्राः सपताकिकाः ।
स्थलमारुह्य गच्छेयुस्तदा धातुर्भविष्यति ॥२०॥
यदा ह्युलूकशकुनाः पर्वतं गन्धमादनम् ।
तुण्डेनादाय गच्छेयुस्तदा धातुर्भविष्यति ॥२१॥

एताश्च गाथाः श्रुत्वाचार्यव्याकरणप्राप्तः कौण्डिन्यो ब्राह्मणः सर्व लोकप्रियदर्शनं लिच्छविकुमारं गाथाभिः प्रत्यभाषत ॥

साधु साधु कुमाराग्र जिनपुत्र महागिर ।
उपायकुशलो वीरः[3] प्राप्तव्याकरणोत्तमः[4] ॥२२॥
मम कुमार शृणोहि लोकनाथस्य तायिनः ।
तथागतस्य माहात्म्यं[5] यथा क्रममचिन्तितम्[6] ॥२३॥
अचिन्त्यं बुद्धविषयमसमाश्च तथागताः ।
सर्व[7]बुद्धाः शिवा नित्यं सर्वबुद्धाः समाचराः ॥२४॥
सर्वबुद्धाः समवर्णा एषा बुद्धेषु[8] धर्मता ।

[1] अहोगताः I. [2] रत्नसं A. [3] वीरः A. T. वीर C. [4] म T.
[5] महात्मस्य A. [6] क्रमस्यचिंतियं A. क्रममचिंतयन् C. [7] सर्वे C.
[8] बुद्धेषु A.

न कृत्रिमो[1] ऽसौ भगवान्नोत्पन्नश्च तथागतः ॥२५॥
वज्रसंहतनकायो निर्मितकायदर्शकः[2] ।
नापि सर्षपमात्रं[3] च धातुर्नाम[4] महर्षिणाम्[5] ॥२६॥
अनस्थिरुधिरे काये कुतो धातुर्भविष्यति ।
उपायधातुनिक्षेपः सत्त्वानां हितकारणम् ॥२७॥
धर्मकायो हि संबुद्धो धर्मधातुस्तथागतः ।
ईदृशो भगवत्काय ईदृशी[6] धर्मदेशना ॥२८॥
एतच्छ्रुतं मया ज्ञात्वाभियाचितं वरं मया ।
तत्त्वव्याकरणार्थाय वरोत्पादं मुनेः कृतम्[7] ॥२९॥

[8]अथ खलु द्वात्रिंशद्देवपुत्रसहस्राणि तथागतस्य यं गम्भीरमायुःप्रमाणनिर्देशं श्रुत्वा सर्वैरनुत्तरायां सम्यक्संबोधौ चित्तान्युत्पादितानि[9] ते प्रहृष्टमनःसंकल्पा एकस्वरनिर्घोषेण गाथामभाषन्[10] ॥

न बुद्धः परिनिर्वाति न धर्मः परिहीयते ।
सत्त्वानां परिपाकाय परिनिर्वाणं निदर्शयेत्[11] ॥३०॥
अचिन्त्यो भगवान्बुद्धो नित्यकायस्तथागतः ।
देशेति[12] विविधान्व्यूहान्सत्त्वानां हितकारणात् ॥३१॥

[1] कृतियो A. कृतिमो K. [2] दर्शयेत् A. C. [3] फल is inserted in T. [4] धतु K. [5] महर्तः T. [6] ईदृशो हि भवेत् काय C. ईदृशी भवेत्काये T. [7] This verse is wanting in the 3rd Chinese version. [8] From अथ till चित्तान्युत्पादितानि left out in C. [9] चित्तामुत्पा° A. C. [10] भापत A. हापन C. भाष T. [11] निर्वाणं परिदेशयेत् C. [12] शु A. शं C. शे T.

अथ खलु रुचिरकेतु[1]र्बोधिसत्त्वस्तेषां बुद्धानां भगवतां तयोश्च द्वयोः सत्पुरुषयोरन्तिकाद्भगवतः शाक्यमुनेरायुः-प्रमाणनिर्देशं श्रुत्वा तुष्ट उदग्र आत्तमनाः प्रमुदितः प्रीतिसौमनस्यजातश्चोदारेण प्रीतिप्रामोद्येन स्फुटो[2] ऽभूत् । अस्मिंस्तथागतायुःप्रमाणनिर्देशे निर्दिश्यमाने ऽप्रमेयाणामसंख्येयानां सत्त्वानामनुत्तरायां सम्यक्संबोधौ चित्तमुत्पादितम् । ते च तथागता अन्तरिता[3] इति ॥

इति [4]श्रीसुवर्णप्रभासोत्तमसूत्रेन्द्रराजे तथागतायुःप्रमाण-निर्देशपरिवर्तो नाम द्वितीयः[5] ॥

[1] तुबो A. T. [2] स्फुटो K. [3] Here the chapter ends abruptly with a word अर्हन्तः in all MSS., but we can ascertain from the Tibetan and Chinese versions that the original form must be like this. [4] श्री left out in A. [5] In the 2nd and the 3rd Chinese version we have a new chapter following this, which discourses on the nature of Buddha's Triple Body, while our text as well as the Tibetan and Dharmarakṣa's translation gives nothing of it.